International Journal of Sanskrit Research 2021; 7(4): 121-127

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 121-127
© 2021 IJSR
www.anantaajournal.com
Received: 08-05-2021
Accepted: 23-06-2021

**सुरेन्द्रचन्द्रत्रिपाठी**
श्रीश्रीविश्वविद्यालयः,
संस्कृतविभागम्
विद्याधरपुरम्, कटकम्,
ओडिशा, भारत

**Corresponding Author:**
**सुरेन्द्रचन्द्रत्रिपाठी**
श्रीश्रीविश्वविद्यालयः,
संस्कृतविभागम्
विद्याधरपुरम्, कटकम्,
ओडिशा, भारत

# सृष्टेः क्रमम् - नासदीयसूक्तेन सह बिग्बैङ्गसिद्धान्तस्य तुलनम्

## सुरेन्द्रचन्द्रत्रिपाठी

## शोधसारम्

प्रागैतिहासिकयुगात् आरभ्य अद्यावधिः मनुष्यः स्वस्य जगतः च सृष्टिसम्बद्धप्रश्नम् अहरहः उत्सुकेन जिज्ञासति । वैज्ञानिकाः एतदर्थं भिन्नाः भिन्नाः सैद्धान्तिकप्रतिकृर्तिं निर्माय उपस्थापयन्ति । धर्मावलम्बिनः स्वधर्मग्रन्थम् आधृत्य तत्र उपलब्धान् मतान् पुष्टिकुर्वन्ति । दार्शनिकाः गभीरानुध्यानेन एतस्य कुतुहलस्य समाधानाय मननं कृत्वा सृष्टेः प्रागवस्थापर्यन्तं मनसा प्रविष्टुं सचेष्टाः । एतेषु रुढिवादिनः स्वमतेषु निर्गत्य नूतनं तथ्यं अनस्वीकुर्वन्ति किन्तु वैज्ञानिकाः दार्शनिकाः च स्वज्ञानभण्डारं सततं परिवर्द्धयित्वा विश्वब्रह्माण्डे लुक्कायितं गभीरं तथ्यं निरावरणयन्ति । यत्र खगोलवैज्ञानिकाः पदार्थवैज्ञानिकाः च विज्ञानमाधृत्य सृष्टिरहस्यम् उद्घाटयितुं प्रयत्नशीलाः तत्र, पक्षान्तरे भारतीयदार्शनिकैः प्राग्वैदिककालात् एतदर्थम् एव बहवः वैप्लविकसिद्धान्ताः प्रदत्ताः । बिग्बैङ्गसिद्धान्तः शोधमूलपदार्थविज्ञानक्षेत्रे आलोडनम् असृजयत् (हकिङ्ग्, १९९०) । नासदीयसूक्ते अन्तर्निहितसत्यमपि विश्ववासिनम् आश्चर्याभिभूतम् अकरोत् ।

> At the same time, as a Hindu, I appreciate the fact that Hinduism professes no false certitudes. Its capacity to express wonder at Creation and simultaneously scepticism about the omniscience of the Creator are unique to Hinduism. Both are captured beautifully in this verse from the 3,500-year-old *Rig Veda*, the Nasadiya Sukta or Creation Hymn: (थरुर्, २०१८, पृ.१७).

सन्दर्भे अस्मिन् नासदीयसूक्तानुसारं बिग्बैङ्गसिद्धान्तानुसारं च सृष्टेः क्रमम् आलोच्यते ।

## प्रथमस्तरीयग्रन्थावलोकनम्

ष्टिफेन्-हकिङ्ग्-महोदयः बिग्बैङ्गथिसिद्धान्तस्य आलोचनम् 'A Brief History of Time'नाम्नि स्वपुस्तके करोति । तस्य मतानुसारं समग्रजागतिकवस्तुः कस्मिन् तमसागर्ते (within a black-hole) समाहितः आसीत् । अमापा आसीत् तस्य तमसागर्तस्य सान्द्रता । ततः आभ्यन्तरास्थिरतया तस्य विस्फोरणम् अभवत् ।

तस्मात् कालात् तत्रस्थाः वस्तवः प्रचण्डवेगैः धावमानाः सन्ति (चित्रम्-१)। दृश्यमानः जगत् एतादृशां धावमानां वस्तूनां समाहारः (हकिङ्ग्, १९९०)।

ऋग्वेदस्य दशममण्डलस्य एकोनत्रिंशत्युत्तरशतसंख्यकसूक्तं 'नासदीयसूक्तम्'नाम्नि ज्ञायते । अस्य सूक्तस्य प्रारम्भे 'नासदासीन्नो'-इति पदं वर्तते, ततः अस्य सूक्तस्य नामकरणं 'नासदीयसूक्तम्' भवति । सूक्ते अस्मिन् सृष्टेः प्राक्कालस्य, सृष्टिकालस्य सृष्टिपरस्य च अवस्था वर्ण्यन्ते (चित्रम्-१) । अतीव रहस्यमयरूपेण अस्य सूक्तस्य समापनं भवति 'सो अङ्ग वेद यदि वा न वेद' इति कथनेन स्वयं स्रष्टां प्रति अङ्गुलिनिर्देशेन।

## शोधान्तरालान्वेषणम्

### प्रथमं अन्तरालम्

बिग्बैङ्गसिद्धान्ताधिकृत्य प्रस्तावितः प्रतिकृतिः आधुनिकवैज्ञानिकसमाजे समादृतः अस्ति । कालतः अस्य सिद्धान्तस्य तृटयः परिलक्षते। एकस्य विश्वस्य स्थाने अधुना बहूनां विश्वानां कल्पना क्रियते, तमःशक्तेः (of the blackholes) विपरितवस्तोः (of anti-matter) च आलोचनं विज्ञानक्षेत्रे आलोडनं सर्जयति।

### द्वितीयं अन्तरालम्

सो अङ्ग वेद यदि वा न वेद' इति कथनेन वेदाः स्वयं पुनरालोचनस्य द्वारम् उन्मोचयन्ति । एतत् प्रयीयते यत् नासदीयसूक्ते मन्त्रद्रष्टा स्रष्टारं प्रति प्रश्नं करोति । भारतीयसंस्कृतेः मूलमन्त्रः अयमेव यत् गुरवः, परब्रह्म अपितु पितरः सर्वे प्रष्टव्यः । प्रश्नोऽयं द्वितीयं अन्तरालम् इङ्गितयति।

## शोधप्रश्नः

उल्लिखितं अन्तरालद्वयं स्वीकृत्य शोधप्रश्नः भवति "नासदीयसूक्ते उपलब्धानां मन्त्राणाम् अध्ययनं, तेषां बिग्बैङ्गसिद्धान्तेन सह तुलनम्" । अस्य शोधप्रश्नस्य उद्देश्याः यथा-

उद्देश्य - १: नासदीयसूक्ते उपलब्धानां मन्त्राणाम् अध्ययनं विश्लेषणं च।

उद्देश्य - २: बिग्बैङ्गसिद्धान्तस्य संक्षिप्ताध्ययनम्।

उद्देश्य - ३: नासदीयसूक्तेन सह बिग्बैङ्गसिद्धान्तस्य तुलनम् ।

उद्देश्य - ४: नासदीयसूक्तस्य मौलिकतायाः विज्ञानसम्मततायाः च निर्धारणम्।

## द्वितीयस्तरीयग्रन्थावलोकनम्

### नासदीयसूक्तम्

वैदिक वाङ्मये वेदाः चतुर्धाविभज्यते ऋक्-यजुस्-सामम्-अथर्वणम्-इति भेदात्। तेषां प्रत्येकानां पुनः चतुर्धाविभाजनं संहिताब्राह्मणारण्यकोपनिषत् भेदात् । एते चत्वारः ब्रह्मचर्य-गार्ह्यस्थ-आरण्यक-सन्यासादिवर्णाश्रमैः संश्लिष्टाः (चित्रम्-३) । एषु सर्वेषु ऋग्वेदः प्राचीनतमः । तत्र दशमण्डलाः, अष्टाविंशत्यधिकसहस्राणि सूक्तानि सन्ति । दशममण्डलस्य नवत्युत्तरशतसंख्यकसूक्तं नासदीयसूक्तम् इति ज्ञायते (चित्रम्-४)। सूक्तेऽस्मिन् मन्त्रास्ख्या सप्त एव। सृष्टेः प्राक्कालस्य तस्य अव्यवहितपरकालस्य च यज्ज्ञानं ऋषिभिः प्रत्यक्षीकृतं तस्य अवधारणा अतिगूढतया सूत्ररूपेण एषु मन्त्रेषु उपलभ्यते । अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूप्यते । अस्य सूक्तस्य प्रथममन्त्रः पाठकानां चित्तं उद्वेलयति यदा ऋषिः वदति तदा सृष्टेः प्राक् सद्वा असद्वा न आसीत्; मृत्युर्वा अमृत्युर्वा न आसीत्; आलोकान्धकारौ न आसीत्; आकाशम् वा व्योमः वा न आसीत्; दिवसं वा रात्री वा न आसीत्; न आसीत् सलिलम् च। एतादृशि आलोकान्धकारात् परे केवलं स एव आसीत्, निर्वातप्रदेशे सः निरवच्छिन्नस्वसनक्रियारतः आसीत् । ततः सृष्ट्यारम्भे प्लावितान्धकारे तमोभावरूपाज्ञानं आच्छादितम् आसीत् । 'आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते' (आचार्य, २००३) । सत्-असद्-विलक्षणेन भावरूप-अज्ञानेन सर्वमिदम् आवृतम् आसीत्। परन्तु सृष्टेः कामना वलवती आसीत्। तस्मात् रौद्रात् रश्मयः बीजरूपे वहिर्गताः सन् दृश्यमानस्य ब्रह्माण्डस्य सर्जनायाः कारणम् अभवत् । वस्तुतस्तु अनन्तोऽयं सृष्टिः । यत्किञ्चिदपि सूक्तेऽस्मिन् दीयते तत् प्रतीकात्मकमेव। असम्भवम् अस्य ब्रह्माण्डस्य सृष्ट्यवधारणम्।

## बिग्बैङ्गसिद्धान्तः

बिग्बैङ्गसिद्धान्तानुसारं सृष्टेः प्राक् अपरिसीमसान्द्रतायुक्तं एकं तमसागर्तं समग्रं ब्रह्माण्डं आत्मसात् कृत्वा आसीत् (चित्रम्-५)। तत्रस्थपरमाणूनां मध्ये आपेक्षिक दूरत्व शून्यं जातम् । आभ्यन्तरीणास्थिरात् तस्य तमसागर्तस्य विष्फोरणम् अभवत् । घटना इयं प्रायशः १३.७७महार्बुदवर्षपूर्वे (13.77 billion years ago) घटिता । विश्वविश्रुतपदार्थवैज्ञानिकः स्टिफेन्-हकिङ्ग्-महोदयः अस्य सिद्धान्तस्य पृष्ठपोषकः । विष्फोरणात् परं तमसागर्तस्थपदार्थाः अतितीव्रवेगेन पलायनमानाः अभवन्। तेषु अन्तर्निहितगुरुत्वाकर्षणात् आकाशगङ्गाः (galaxy) नक्षत्रपुञ्जाः वा अभवन्। अद्यापि आकाशगङ्गाः नक्षत्रपुञ्जाः आदयः प्रायशः आलोकवेगेन धावमानाः (चित्रम्-६) । बहु वैज्ञानिकाः, दार्शनिकाः च इमं सिद्धान्तं स्वीकुर्वन्ति। अन्ये च बहवः आधुनिकिखगोलशास्त्रज्ञाः अस्य विरोधमपि कुर्वन्ति।

## निष्कर्षम्

नासदीयसूक्तं विहाय अन्यानि सूक्तानि विश्वस्य सृष्टिप्रक्रियां पुष्टिं कुर्वन्ति । वैदिकवाङ्मये ऋग्वेदीय पुरुषसूक्तं अपि च हिरण्यगर्भसूक्तं, अथर्ववेदे चतुर्थमण्डले प्रथमानुवाक्,

भागवतपुराणं, ब्रह्माण्डपुराणं, वायुपुराणं च विश्वसृष्टेः कारणम् उद्घोषयन्ति (*The golden womb and the cosmic egg*, n.d.)। ते सर्वे उक्तयः विज्ञानसम्मताः इति वक्तुं न शक्नुमः। केचित् जनाः इमं ज्ञानं “pseudo science” इति आख्यायन्ति, इदं वक्तव्यं तेषाम् अभिरुचिविहीनमज्ञानं परिस्फुटयति। स्वज्ञाने अनभिरुचि, शोधकार्यस्य अभावं, बहुवर्षयावत् यवनानां दमनलीला अस्माकं भारतीयानां चेतनायाः बाधकाः भवन्ति। बैदिकवाङ्मये लुक्कायितानां ज्ञानानां निरावरणम् अवश्यं कार्यम्।अधुना उपलब्धानि समस्तज्ञानानि वेदमध्ये समाविशते इति कथनं निश्चयेन अत्युक्तिः, किन्तु समग्रज्ञानस्य मूलं वीजरूपेण वेदे समाहितम् इति उक्तिः अनस्वीकार्यः।

बिग्बैङ्गसिद्धान्ताः कठोरसमालोचनायाः वशवर्तीनः भवति अधुना। एकमेव विश्वस्य स्थाने बहूनां विश्वानां परिकल्पनां उपस्थापयन्ति वैज्ञानिकाः। नासदीयसूक्ते तस्य वीजं द्रष्टव्यम् यत्

“तम आसीत्तमसा गूळहमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्य्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥३॥”

तमसा गूढतया आवृताः आसीत् तमः इति वेदवाक्यं अनाविष्कृतस्य तमोमयमहाभूतस्य अपि च ‘त्रिपादुर्द्ध उदैत्पुरुषः पोदोऽस्येहाभवात् पुनः’ संख्यातीतविश्वानां नैकविश्वानां वा धारणां ददाति। ओडिआभागवतपुराणे अपि उक्तम् “ବ୍ରହ୍ମାଣ୍ଡ ମାଳମାଳ ଉଡ଼େଇ, ଯା ଲୋମକୂପରେ ଛନ୍ତି ରହି ॥” (https://thecosmichorizon.in/)। अर्थात् अस्य भगवतः प्रत्येकलोमकूपमूले संख्यातीताः ब्रह्माण्डाः सन्निहिताः (चित्रम्-७)।

शरीरसुखाय वयं प्रकृतिं व्यवहरामः। ततः मनुष्यसमाजस्य कल्याणं भवतीति नात्र सन्देहः। किन्तु अस्माकं वैदिकवाङ्मये अनन्तज्ञानानां मूलं वीजरूपेण समावर्तते। कथनस्य अयमाशयं यत् नासदीयसूक्तं बिग्बैङ्गसिद्धान्तात् बह्वधिकं ज्ञानं बहति। तेषां वहिष्करणं कार्यं, सर्वजनहिताय तेषां प्रयोगमपि करणीयम्।




चित्रम् - १. (The history of the Universe, from the Big Bang to the current epoch. phys.org/news/2015-12-big-theory.html)



'चित्रम् - २. Is it time to dethrone the Big Bang Theory? (bq-magazine.com/is-it-time-to-dethrone-the-big-bang-theory/)

"तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात्॥५॥"




चित्रम् - ३ वेदानां विभाजनम्, (द्विवेदी, २०१७. पृ २-१०.)




चित्रम् - ४. नासदीयसूक्तस्य स्थानम्




चित्रम् - ६. क्रमवर्द्धिष्णुब्रह्माण्डः ।bq-magazine.com/is-it-time-to-dethrone-the-big-bang-theory/



चित्रम् ५. qz.com/487418/stephen-hawking-explains-how-to-escape-a-black-hole/



चित्रम् ७. नैकविश्वम् Multiverse (zidbits.com/)

**आम्नायितानि कार्याणि (Works Cited)**


1. आचार्यः, सायणः. त्रिवेदः, रामगोविन्दः. (२००३). ऋग्वेदसंहिता, अष्टमाष्टकम्. चौखम्बाविद्याभवनम्।
2. कल्याणम्, त्रयेदशमुद्रणम्. (२०१७). गीताप्रेस्, गोरक्षपुरम्.
3. बासम्, ए. एल्. (१९६७). The Wonder that was India, तृतीयमुद्रणम्. तैपलिङ्गर् पॉब्लिशिङ् कम्पनी, न्युयर्कम्।
4. थारूर, शशी. Why I am a Hindu. (२०१८). सि. हर्ष्ट ऐण्ड को. लण्डनम्.
5. दाहालः, लोकमणिः. (२०१६). संस्कृतसाहित्येतिहासः, चौखम्बाकृष्णदास-अकादेमी, वाराणसी।
6. द्विवेदः, पारसनाथः. (२०१७). A History of Vedic Literature. चौखम्बासुरभारतीप्रकाशनम्।
7. पाठकः, जमुना. प्रसादः उमेशः. (२०१६). नवीनवैदिकमञ्जनम्. द्वितीयखण्डम्. पृश्ठसंख्या १०.

8. राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति. संस्कृतसाहित्येतिहासः. प्रथमखण्डः. (२०१४)
9. हकिङ्ग्, ष्टिफेन्. (१९९०). A Brief History of Time. बैण्टम्-बुकस्.
10. Is It Time To Dethrone The Big Bang Theory? 14th May 2021, 09:37 a.m. www.forbes.com/sites/jamiecartereurope/2020/05/14/is-it-time-to-dethrone-the-big-bang-theory-heres-how-you-overthrow-it/?sh=45cae81120d9.
11. Project Gutenberg Self-Publishing Press, Nasadiya Sukta. self.gutenberg.org/articles/eng/Nasadiya_Sukta, 12th May 2021, 12:30p.m.
12. The golden womb and the cosmic egg. https://timesofindia.indiatimes.com/the-golden-womb-and-the-cosmic-egg/articleshow/5083942.cms accessed on 26th June 2021 at 04:37Hrs.